एतेन शाम्यति क्षिप्रं बलवानपि यो ग्रहः” ।
अश्वलोमादिधूपः ॥ * ॥
“कल्याणकञ्च युञ्जीत महद्वा चैतसं घृतम् ।
तैलं नारायणं चाथ महानारायणं तथा ॥
अस्ते पिशाचादन्येषु प्रतिकूलं न चाचरेत् ।
रोगिणं भिषजं यत्ते क्रुद्धा हन्युर्महौजसः” ॥
इत्युन्मादाधिकारः । इति भावप्रकाशः ॥

आत्रेय उवाच ॥

“अयं मानसको व्याधिरुन्माद इति कीर्त्तितः ।
प्रमत्ता ऊर्द्धगा दोषा ऊर्द्धं गच्छन्त्यमार्गताम् ॥
उन्मादो नाम दोषोऽयं कष्टसाध्यो भिषग्वरैः ।
सोऽपि पृथग्विधैर्दोषैर्द्वन्द्वजोऽन्यः प्रकीर्त्तितः ।
अथान्यः सन्निपातेन विषाद्भवति चापरः ॥
अशुचिविषयशून्यागारकेऽरण्यमध्ये
सभयगहनवीथीदेवतागारके च ।
अथ कथमपि भीत्या शङ्कया खिन्नचेतः-
क्षुभितमनसमार्गत्याज्यसुन्मार्गमेति ॥
चिन्ताव्यथात्रयहर्षविमर्षलोभात्
देवातिथिद्विजनरेन्द्रगुरोर्विमानात् ।
प्रेमाधिकाद्युवजनादपि विप्रयोगात्
उन्मादहेतु च नृणां कथितं वरिष्ठैः ॥
तत्र गायति वा रौति विरूपं पठते यदा ।
लोजयेच्छर्द्दते वापि कम्पते हसते तथा ॥
धावते हनने चैव तथा जिह्वा विनश्यति ।
नरो वा भ्रमतेऽत्यर्थं पश्येद्घनमथातुरः ॥
तस्यापस्मारकं कर्म्म कर्त्तव्यं भिषगवरैः ।
विशेषेण भूतविद्यां मध्ये वक्ष्यामि चाग्रतः” ॥
इति महर्ष्यात्रेयभाषिते हारीतोत्तरे द्वितीयस्थाने उन्मादनिदाननामा विंशोऽध्यायः ॥
अस्य सम्प्राप्तिसहित-निदानलक्षण-चिकित्सितान्याह वाभटः ॥
“उन्मादाः षट् पृथग्दोषनिचयाधिविषोद्भवाः ।
उन्मादो नाम मनसो दोषैरुन्मार्गगैर्मदः ॥
शारीरमानसैर्दुष्टैरहितादन्नपानतः ।
विकृताशात्म्यसमलादिषमादुपयोगतः ॥
विषमस्याल्पसत्त्वस्य व्याधिवेगसमुद्गमात् ।
क्षीणस्य चेष्टावैषम्यात् पूज्यपूजाव्यतिक्रमात् ॥
आधिभिश्चित्तविभ्रंशाद्विषेणोपविषेण च ।
एभिर्विहीनसत्त्वस्य हृदि दोषाः प्रदूषिताः ॥
धियो विधाय कालुष्यं हत्वा मार्गान् मनोवहान्
उन्मादं कुर्व्वते तेन धीविज्ञानस्मृतिभ्रमात् ॥
देहो दुःखसुखभ्रष्टो भ्रष्टसारथिवद्रथः ।
भ्रमत्यचिन्तितारम्भम्”—

वातादिभेदेन लक्षणं यथा ॥

“तत्र वातात् कृशाङ्गता ॥
अस्थाने रोदनाक्रोशहसितस्मितनर्त्तनम् ।
गीतवादित्रवाग्भङ्गविक्षेपास्फोटनानि च ॥
असाम्ना वेणुवीणादिशब्दानुकरणं मुहुः ।
आस्यात् फेनागमोऽजस्रमटनं बहुभाषिता ॥
अलङ्कारोऽनलङ्कारैरयानैर्गमनोद्यमः ।
गृद्धिरभ्यवहार्य्येषु तल्लाभे चावमानता ॥
उत्पिण्डिताक्षाणाक्षित्वं जीर्णे चान्ने गदोद्भवः ॥ १ ॥
पित्तात् सन्तर्ज्जनं क्रोधो मुष्टिलोष्टाद्यभिद्रवः ।
शीतच्छायोदकाकाङ्क्षा नग्नत्वं पीतवर्णता ।
असत्यज्वलनज्वालातारकादीपदर्शनम् ॥ २ ॥
कफादरोचकश्छर्द्दिरल्पेहाहारवाक्यता ।
स्त्रीकामता रहः प्रीतिर्लालासिङ्घाणकस्रुतिः ॥
वैभत्स्यं शौचविद्वेषो निद्राश्वयथुराननं ।
उन्मादो बलवान् रात्रौ भुक्तमात्रे च जायते ॥ ३ ॥
सर्व्वायतनसंस्थानसन्निपाते तदात्मकम् ।
उन्मादं दारुणं विद्यात् तं भिषक् परिवर्ज्जयेत् ॥ ४ ॥
धनकान्तादिनाशेन दुःसहेनाभिषङ्गवान् ।
पाण्डुर्दीनो मुहुर्मुह्यन् हाहेति परिदेवते ॥
रोदित्यकस्मान् म्रियते तद्गुणान् बहु मन्यते ।
शोकक्लिष्टमना ध्यायन् जागरूको विचेष्टते ॥ ५ ॥
विषेण श्यावबदनो नष्टच्छायाबलेन्द्रियः ।
वेगान्तरेऽपि संभ्रान्तो रक्ताक्षस्तं विवर्जयेत्” ॥ ६ ॥

चिकित्सा यथा ॥

“अथानिलज उन्मादे स्नेहपानं प्रयोजयेत् ।
पूर्व्वमावृतमार्गे तु सस्नेहं मृदुशोधनम् ॥
कफपित्तभवेऽप्यादौ वमनं सविरेचनम् ।
तथास्य शुद्धदेहस्य प्रसादं लभते मनः ॥
इत्थमप्यनुवृत्तौ तु तीक्ष्णं नावनमञ्जनम् ।
हर्षणाश्वासनोत्त्रासभयताड़नतर्ज्जनम् ॥
अभ्यङ्गोद्वर्त्तनालेपधूमान् पानञ्च सर्पिषः ।
युञ्ज्यात्तानि हि शुद्धस्य नयन्ति प्रकृतिं मनः” ॥ * ॥
“द्वौ प्रस्थौ स्वरसाद्ब्राह्म्या घृतप्रस्थञ्च साधितम् ॥
व्योषश्यामात्रिवृद्दन्तीशङ्खपुष्पीनृपद्रुमैः ।
ससप्तलाक्रिमिहरैः कल्कितैरक्षसम्मितैः ॥
पलवृद्ध्या प्रयुञ्जीत परं मात्राचतुष्पलम् ।
उन्मादकुष्ठापस्मारहरं बन्ध्यासुतप्रदम् ॥
वाक्स्वरस्मृतिमेधाकृद्धन्यं ब्राह्मीघृतं स्मृतम्” ॥

इति ब्राह्मीघृतम् ॥ * ॥

“वरा विशाला भद्रैला देवदार्व्वेलवालुकैः ।
द्विसारिवा द्विरजनी द्विस्थिरा फलिनी नतैः ॥
बृहतीकुष्ठमञ्जिष्ठानागकेशरदाड़िमैः ।
वेल्लतालीशपत्रैलामालतीमुकुलोत्पलैः ॥
सदन्तीपद्मकहिमैः कर्षांशैः सर्पिषः पचेत् ।
प्रस्थं भूतग्रहोन्मादकासापस्मारपाप्मसु ॥
पाण्डुकण्डुविषे शोषे मोहे मेहे गरे ज्वरे ।
अरेतस्यप्रजसि वा दैवोपहतचेतसि ॥
अमेधसि स्खलद्वाचि स्मृतिकामेऽल्पपावके ।
बल्यं मङ्गल्यमायुष्यं कान्तिसौभाग्यपुष्टिदम् ॥
कल्याणकमिदं सर्पिः श्रेष्ठं पुंसवनेषु च” ॥

इति कल्याणघृतम् ॥ * ॥

“एभ्यो द्विसारिवादीनि जले पक्त्वैकविंशतिम् ।
रसे तस्मिन् पचेत्सर्पिर्गृष्टिक्षीरं चतुर्गुणम् ॥
वीरर्षभद्विमेदाकाकोलीकपिकच्छुविषाणिभिः ।
मुद्गपर्णीयुतैरेतन्महाकल्याणकं परम् ॥
बृंहणं सन्निपातघ्नं पूर्व्वस्मादधिकं गुणैः” ॥

इति महाकल्याणं घृतम् ॥ * ॥

“जटिला पूतना केशी चारटी मर्कटी वचा ॥
त्रायमाणा जया वीरा चोरकः कटुरोहिणी ।
कायस्था शूकरीच्छत्रा अतिच्छत्रा पलङ्कषा ॥
महापुरुषदन्ता च वयस्था नाकुलीद्वयम् ।
कटम्भरा वृश्चिकाली शालिपर्णी च तैर्घृतम् ॥
सिद्धं चातुर्थिकोन्मादग्रहापस्मारनाशनम् ।
महापैशाचकं नाम घृतमेतद्यथामृतम् ॥
बुद्धिमेधास्मृतिकरं बालानाञ्चाङ्गवर्द्धनम्” ॥

इति महापैशाचकं घृतम् ॥ * ॥

“अवपीड़ाश्च विविधाः सर्षपाः स्नेहसंयुताः ।
कटुतैलेन चाभ्यङ्गो ध्मापयेच्चास्य तद्रजः ॥
सहिङ्गुस्तीक्ष्णधूमश्च सूत्रस्थानोदितो हितः ॥ * ॥
शृगालशल्यकोलूकजलूकावृषवस्तजैः ।
मूत्रपित्तशकृल्लोमनखचर्म्मभिराचरेत् ।
धूपधूमाञ्जनाभ्यङ्गप्रदेहपरिषेचनम् ॥
धूपयेत् सततञ्चैनं श्वगोमत्स्यैस्तु पूतिभिः ।
वातश्लेष्मात्मके प्रायः पैत्तिके तु प्रशस्यते ॥
तिक्तकं जीवनीयञ्च सर्पिः स्नेहश्च मिश्रकः ।
शिशिराण्यन्नपानानि मधुराणि लघूनि च ॥
विध्येच्छिरां यथोक्तां वा हृतं मेध्यामिषस्य वा ।
निवाते शाययेदेवं मुच्यते मतिविभ्रमात्” ॥
“भूतानुबन्धमीक्षेत प्रोक्तालिङ्गाधिकाकृतिम् ॥
यदुन्मादे ततः कुर्य्याद्भूतनिर्द्दिष्टमौषधम् ।
बलिञ्च दद्यात् पललं यावकं सक्तुपिण्डिकाम् ॥
स्निग्धं मधुरमाहारं तण्डुलान् रुधिरोक्षितान् ।
पक्वामकानि मांसानि सुरामैरेयमासवम् ॥
अतिमुक्तस्य पुष्पाणि जात्याः सहचरस्य च ।
चतुष्पथे गवां तीर्थे नदीनां सङ्गमेषु च ।
निवृत्तामिषमद्यो यो हिताशी प्रयतः शुचिः ।
निजागन्तुभिरुन्मादैः सत्त्ववान्न स युज्यते ॥
प्रसाद इन्द्रियार्थानां बुद्ध्यात्ममनसान्तथा ।
धातूनां प्रकृतिस्थत्वं विगतोन्मादलक्षणम्” ॥ * ॥
इति वाभटे उत्तरस्थाने सप्तमोऽध्यायः ॥

अस्य सनिदानसंप्राप्तिर्यथा ।

“इह खलु पञ्चोन्मादा भवन्ति । तद्यथा,— वातपित्तकफसन्निपातागन्तुनिमित्तास्तत्र दोषनिमित्ताश्चत्वारः ।
पुरुषाणामेवंविधानां क्षिप्रमभिनिर्व्वर्त्तन्ते तद्यथा,
“भीरूणामुपक्लिष्टसत्त्वानामुत्सन्नदोषाणाञ्च मलविकृतोपहितानि अनुचितान्याहारजातानि वैषम्ययुक्तेनोपयोगविधिनोपयुञ्जानानां तन्त्रप्रयोग वा विषममाचरतामन्यां वा चेष्टां विषमां समाचरतामत्युपक्षीणदेहानाञ्च व्याधिवेगसमुद्भ्रमितानामुपहतमनसां वा काम-क्रोध-लोभ-हर्ष-भय-शोक-चिन्तोद्वेगादिभिः पुनरभिघाताभ्याहतानां वा मनस्युपहते बुद्धौ च प्रचलितायामभ्युदीर्णाः दोषाः प्रकुपिता हृदयमुपसृत्य मनोवहानि स्रोतांस्यावृत्य जनयन्त्युन्मादम् । उन्मादं पुनर्मनोबुद्धि-संज्ञा-ज्ञान-स्मृति-भक्ति-शील-चेष्टाचार-विभ्रमं विद्यात्” ॥
तस्येमानि पूर्व्वरूपाणि । तद्यथा,—
“शिरसः शून्यभावः चक्षुषोः व्याकुलता स्वनः कर्णयोरुच्छ्वासस्याधिक्यमास्यसंस्रवणमनन्नाभिलाषोऽरोचकाविपाकौ हृदयग्रहो ध्यानायास-सम्मोहोद्वेगाश्चास्थाने सततं लोमहर्षो ज्वरश्चाभीक्ष्ण-